शोलगुलेकेते वीणादिवादनोपाय एकदेशगृहस्य च शो
णः श्योणाकनदयोः शोणः कोकनदच्छवौ लोहिताश्वे कृशानौ
च भ्रूणः स्त्रीगर्भडिंभयोः तीक्ष्णः समुद्रलवणे विषलोहाजि
मुष्कके तीक्ष्णं क्षारे च तिग्मात्मत्यागिनोर्वाच्यवद्भवेत् क
णिः पृथ्वात्येष्ठस्तु ते सुवर्णलोहस्रुतावपि चूर्णिः क्षौद्रे च ऊढे च
वर्णिः कंचनयज्ञयोः वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपयशो
क्षरे विलेपने कुथायां च वर्णः स्याद्गुणभेदयोः पर्णः किंशुके स्यात्
पत्रे शीर्णा तनु विशीर्णयोः पूर्णः शब्दे समग्रे च पूरिते वापि
वाच्यवत् चूर्णिः क्षोदे क्षारभेदे चूर्णानि वासयुक्तिषु कीर्णं छि
न्ने परिक्षिप्ते हिंसिते कीर्णमिष्यते जीर्णं पक्के पुराणे च दीर्णं
दारितभीतयोः उष्णः स्यादातपे ग्रीष्मे दक्षे कृष्णस्तु केशवे व्या
सेऽर्जुने कोकिले च कृष्णं मरिचलोहयोः कृष्णा तु द्रौपदी नीली
कास्रद्राक्षासु कणास्वते वाच्यवन्मेचके कृष्णं जिष्णुः शक्रे धनंजये
जित्वरे चाथ जिष्णुः स्यान्नात्यच्छे वसुदेवते जिष्णुर्नरे गायने २४

चंदे घुर्दातरिदुर्द्दमे ऊर्घिस्तु यादवे मेषे ऊर्घिः पारंवडे चंडयोः पा
र्ष्णिः पाश्चात्यपादभागे स्यात्पादमूलोन्मदास्त्रियोः सेनापृष्ठे च कुंत्यां
च तृष्णा लिप्सापिपासयोः ऊर्णा मेषादिलोम्नि स्यादंतरावर्त्तके
भ्रुवोः मणिर्गोलस्त्रे मेहनाग्रे रत्ने चाजागलस्तने श्राणि राणिर्वदंता
ग्रेकीले स्यादसिसीमयोः कुणिस्तु नकवृक्षेपि कुणिः स्यात् कुकु
रेन्यवत् कृणः कणुकभेदेपि दुष्टदेवस्मृतावपि श्रेणिः पंक्तौ से
कपात्रे श्राणिः स्यात्कारुसंहतौ वाणिः स्याद्व्यूतिभारत्योर्व्याणिः
ल्पेवलाहके वेणीकेशस्य संबंधः स्यान्नदीनां मेलकेपि च देव
ताडे च तूणीरे नील्यां तूणी निषंगके घृणा जुगुप्सा कृपयोः फ
णिर्भुजंगकरयोः प्राणायवगवायपक्षे तु प्राणं स्थूणा यःसूता
प्रतिमायां गृहस्तंभे वीणा वल्लकि विद्युतोः वेणुर्भूपांतरे वंशे
स्थाणुः कीले स्थिरे हरे रेणुः पर्पटके धूल्यां मल्ल्यांणु व्रीहिसू
क्ष्मयोः णत्रि अरुणो व्यक्तरागे स्यात्संध्यारागेर्कसारथौ निःश
ब्दे कपिले कुष्ठद्रव्ये वाच्यवदिष्यते अरुणातिविषा श्यामा मंजिष्ठा
त्रिवृतासु च करुणस्तु रसे वृक्षे कृपायां करुणा मता वरुणः स
मतानीरस्वर्लोकपरमेष्ठिनि तरुणः स्यान्नवे यूनि कुब्जपुष्पे
रुबूकयोः वरुणा तरुभेदस्युः प्रतीचीपतिसूर्ययोः वरुणस्ति

कः शाकेपि प्राकारवेष्टनेरणे। चरणो वह्वृचादौ स्यात् मूले गोत्रे पदे
ऽपि च चरणं भ्रमणे राज्ञो रवणं रासभध्वनौ लवणं रसरक्षोब्धिभे
दे पुल्लवणं त्विषि करणं साधकतमे क्षेत्रकायस्थकर्मसु गीतांग
हारसंवेशक्रियाभेदेंद्रियेषु च वाडवादौ च करणः स्मृतः शूद्राविं
शोः सुते जरणं जीरकाजाजि हिंगुसौवर्चलेष्वपि धरणं मानभे
देपि धारणे धरणी भुवि रमणं स्यापटोलस्य मूलेपि रमणः प्रि
ये शरणं गृहरक्षित्रोः शरणं रक्षणे गृहे कत्तृणं तृणभेदे स्याद्धा
रिपण्यां च कर्तृणे। पंचत्रणास्थौ स्यान्निशमने वंधने रतृणोपि च प्र
घणस्त्राम्रकुंभे स्यादलिंदे लोहमुद्गरे द्रुघणो मुद्गरेपि स्याद्द्रुहि
णे च परश्वधे प्रवणः क्रमनिम्नोर्व्यामायत्ते च चतुःपथे प्रगुणोपि
गुणेपि स्यादीरणं शून्यमूषरं ग्रहणं स्वपल्लवौ स्यादादरे ग्रह
णं करे ग्रहोपरागस्वीकारवंदीषु ग्रहणं मतम् ईक्षणं दर्शने
दृष्ट्यौ प्रोक्षणं सेचने वधे लक्षणं नाम्नि चिह्ने स्यात्सौमित्रेचापि ल
क्ष्मणः लक्ष्मणं लांछने नाम्नि रामभ्रातरि लक्ष्मणः लक्ष्मणोऽब
धिसारस्योः सश्रीके त्वभिधेयवत् दक्षिणः सरलावामपरछं
दानुवर्तिषु वाच्यवद्दक्षिणा चापि यज्ञदानप्रतिष्ठयोः द्रविणं कांच
ने वित्ते द्रविणं च पराक्रमे प्रस्रवणः कक्षिरे स्निग्धे हृमायां प्रस्रवणा
भवेत् श्रवणं नरीश्चेरस्यात्तेकर्णायमुश्रवणा भवेत् धिषणास्त्रीदणा

चार्व्यां धिषणा धियि सम्मता घर्षणं स्यात्परिभवे रतौ सत्यां तु
घर्षणी भीषणो दारुणे गाढे भीषणं सल्लकीशरे हरणं यौत
कद्रव्ये भुजेऽपि हरणं हृतौ हिरण्यं रेतसि स्वर्णे वराटे च हिर
ण्यवत् हरिणः स्यात्कुरंगेऽपि हरिणः पांडुरेन्यवत् हरिणी ह
रितायां च वारस्त्री वृत्तभेदयोः सुवर्णप्रतिमायां च हषणं
द्विरुक्तरे हषिके योगभेदे च श्राद्धदेवेऽपि च क्वचित् श्रवणं
स्यादृक्षभेदे श्रवणं श्रुतिकर्णयोः श्रावणो मासि पाखंडे द
ध्याज्ञा श्रावणसंमता श्रावणो यतिभेदेऽपि श्रमनो निंद्यजीवि
नि सुदर्शना मुंडितिका मांसी बुश्रवणं विदुः कल्याणमक्षये
स्वर्णे कल्याणं मंगलेऽपि च कृपाणोऽस्यौ कृपाणी तु छुरिका
यां च कर्तरी रोसिंहाणं काचपात्रे स्याल्लोहनासिकयोर्मले पुरा
णं त्वाख्यवस्त्रे तने पुराणं पंचलक्षणे प्रमाणं नित्यमर्यादासत्यवा
दि प्रमातृषु पंकतायामियत्तायां हेतुशास्त्रेषु च स्मृतं नि
र्याणं वारणापांगदेशे मोक्षे च निर्गमे निर्माणं निर्मितौ सारे वि
माणं च समंजसे निर्वाणमस्तंगमने तत्त्वहीनो गजमज्जने अपव
र्गे च कुर्वाणो भृत्यकारकयोरपि दोर्वणं द्रव्यपर्वे स्याद्वीयाः स्व

रसेपि च वारणं प्रतिषेधे स्याद्वारणस्तु मतंगजे कारणं करणे हेतु
वधयोरपि कारणं कारणा यातनायां च कृपणः कुत्सिते कृतौ का
र्मणं मंत्रतंत्रादियोजने कर्मकारके मार्गणं प्रार्थनान्वेषे मार्गणो
याचके शरे मत्कुणो निर्विषेभे निःश्मश्रुपुरुषेपि च उद्दंशे ना
लिकेरे च चर्मणो भिदुमभेदयोः कौंकणो देशभेदे च शस्त्रभेदेपि
कौंकणी कंकणं शेखरे हस्तसूत्रमंडनयोरपि पूरणः पूरके पिष्ट
भेदे पूरणमुच्यते पटारंभकसूत्रे च शाल्मलौ पूरणी मता सुषे
णः करमर्द्दे स्याद्विष्णुसुग्रीववैद्ययोः शोणः कारदे स्याद्व
ह्निणोपतयोस्तथा शोणोपि विषाणं तु क्रोडद्विरदंतयोः प
शुश्रृंगे विषाणी च मेषश्रृंग्यां च कीर्तिता करेणुर्गजहस्तिन्यो
ः कर्णिकारेपि च ब्रह्मचैत हरेणुश्च सतीने स्याद्रेणुकाकुलयो
षितोः सुवर्णं स्वर्णमात्रे स्यात्सुवर्णः कर्षवित्तयोः सुवर्णश्च सु
वर्णालुः कृष्णागुरुसमरवांतरे सुपर्णः स्वर्णचूडे स्यान्नगस्ते
कृतमालके सुपर्णी कमलिन्यां च सुपर्णी तार्क्ष्यमातरि पर्णी
पर्णमग्निमंथे श्रीपर्णी शाल्मलीतरौ दुर्वर्णं च कुवर्णे स्याद्वा
लुके रजतेपि च पत्रोर्णं धौतकौशेये पत्रोर्णः शोणकेपि च

ततः सकलवैद्यकतन्त्ररत्नाकरश्रियमवाप्य च केशवो भूत् वै
द्विकतनमनिंद्यपदप्रमाणवाक्यप्रपंचरचनाचतुराननश्रीः ९
यस्य तस्य च सुतः स्फीतपुंडरीकखंडातपत्रपरभागयशःपताक
श्रीव्रजनिद्रुत्यविकलातमुखारविंदसोल्लासलासितरसार्द्रस
तीकः १० तस्यात्मजः सरसकैरवकांतकीर्तिः श्रीमान्महेश्वर
ति प्रथितः कवींद्रः निःशेषवाङ्मयमहार्णवपारदृश्वा शब्दाः
बुरुहखंडरविर्बभूव ११ यः साहसांकचरितादिमहाप्रबंधनिर्म
णनैपुणगुणगतगौरवश्री यो वैद्यकत्रयसरोजसरोजबंधुर्वै
: सतां च कविकैरवकुंदलेंदुः १२ इयं कृतिस्तस्य महेश्वरस्य वै
दग्ध्यसिंधोः पुरुषोत्तमानां देदीप्यतां हृत्कमलेषु नित्यमाकल्प
माकल्पितकौस्तुभश्रीः लब्धैः कथंचिदभिजातसुवर्णकारलील
नकोपशातरलविशब्दरत्नैः विश्वप्रकाशद्युतिकांचनवद्दशोभां
विभ्रन्मयात्र घटितामुखखंडलेखः १४ फणीश्वरोदीरितशात
शरत्नाकरालोडनलालितानां सेव्यः कथं नैव सुवर्णरेखे
काशो विबुधाधिपानां १५ भोगींद्रकात्यायनसाहसांक
...गुरुः सरणि ...

(7)
शिव
५।४।२।१।५।३
Sams
483
V829

त्रउः सकलवै
न्नि केतनमन्नि
घ्नस्यतस्य
श्रीब्रह्मदुत्वविक
तीकः १ तस्य
ते प्रथितः कवी
बुरुमरवंडरविकी
ण नैपुणगुण
: सतं च कविकै
दग्ध्वसिंधोः पु
माकल्पितकौस्तु
न कोशशतर
विभ्रन्मया त्रय
शरत्नाकरालोड
काशोविबुधा
यानी पुरः सरा

॥ श्रीगणेशायनमः स्तुवीमहिमामोहक्लेशशांतकमिभवक्त्रं श्रे
यस्कंदनहंसद्वंद्वंदुःखहानये १ कलाविलासानुमकरंदविंदु
[illegible] विनिर्देहृदयारविंदे याकल्पयन्नीरमतेकवीनांदेवीनम
[illegible] मसारस्वतीतां २ कवींद्रकुमुदानंदकंदोन्नमसुधाकरं वा
स्पतिमतिस्पर्द्धिरामुखीचंद्रकोज्वलं ३ [illegible]
नालोल्लासियशःश्रियं गुरुंवंदे जगद्वंद्यंगुणरत्नैकरोहणं
श्रीसाहसांकनृपतेरनवद्यविद्यावैद्यात्तरंगपदचक्रनिवेश
यस्कुर्वन्चरितोत्तरं हरिश्चंद्रनामास्वव्याख्यावरकतत्रैमल्ल
कार ५ आसीदसीमवसुधाधिपवंदनीयेतस्यान्वयेसक
वैद्यकुलावतंसः शाकस्यदस्त्रटुवगाधिपुराधिपस्यश्रीकृ
[illegible] तुल्यमल्लकीर्तिलतावितानः ६ सेकालसंभिन्नदलल्लति
व्यप्रान्यकल्याननल्लाकुलितवादिसाम्राज्यविधुः तदंगजपति
[illegible] नरत्नतनयस्तदीयोदामोदरःसमभवद्भिषजांवरेण्यः ७ त
पसिनत्स [illegible] सुदारवरो [illegible] वस्पतिःश्रीलालनाविलासी सर्वे
लोकेरजोतिनाशिनेशः श्रीमल्ल [illegible] कुमुदाकरेंदुः ८ य [illegible]

ह्लादनी स्याद्वरवर्णिनी लाक्षाताम्र हरिद्रा रोचनासु च सुरत्ने च फलिन्यां च द
रयते वरवर्णिनी नघट् अंतावसायी श्वपचे च मुनिभेदे च नापिते
जायानुजीवी तु नटे दुर्गतास्विनयोर्बले सहस्रवेधी स्यादम्लवेतसेरा
मठेपि च कलानुनादी रोरंबे कलविंके कपिंजले नांतवर्गः
पाद्वे· रूपं प्रभावसौंदर्य्ये तानके पशुशब्दयोः गंधाढ्य तौ नाटकादावा
कारश्लोकयोरपि रेपः स्यान्निंदिते क्रूरे रोपो रोपणबाणयोः सूपो व्यं
जनभेदे स्यात्सूपकारे च कीर्त्तितः लुपः लुपस्पर्शनयोश्चुपः पवनमुद
योः कूपः कूपकगर्त्ते तु मृन्मानगुणवृक्षके तापोभिताघे दविशोता
पी तु सरिदंतरे शापः शपथ आक्रोशे त्रपुसीसकरंगयोः स्वापः स्प
र्शाज्ञता निद्राशयने ज्ञानमात्रके नीपो धूलीकदंबे स्यान्नीलाशोके च
धन्वनि गोपो गोष्ठे गोष्ठाधिकृतयोर्वल्लभेन्द्रपे गोपी गोपालम
हिलासारिवारिद्विकासु च द्वीपो विलंबे निंदायां गिलाप्ररणलं घने ग
वेपि तल्पस्तु सुधा जेमनाल्पने चु च तल्पं च शयनीये स्यात्तल्पमट्ट
कलत्रयोः कल्पः स्यात्प्रलये न्याये शास्त्रे ब्रह्मदिनावधौ दर्पो गिका
रकस्तूर्य्योः कार्ष्यो नेत्रजल्लोप्प्रमणाः पुष्पं विकासे कुसुमे स्त्रीरजे च र
जस्यपि स्मृतं शेष्पं स्यात्प्रतिभा मतानो शष्पं वालतृणेपि च शष्पं शुभे

क्रियायोग्यशब्दः क्रोधे बलाकृतौ कृपा दयायां व्यासर्षौ कृपो भारतपूरु
षे त्रपा लज्जा कुटुपयोर्दपा विवरभेदयोः पत्रि कुतपः स्यात्कुशे वा
द्येनपने छागकंबले कुतपो भागिनेये स्यादष्टमांशे दिनस्य च कुट
पो मानभेदे स्यात्कुटुपो निष्कुटे मुनौ विटपः पल्लवे वर्रवंगे विस्तारे स्तं
बशाखयोः उलपस्तृणभेदे स्याद्गुल्मिन्यामुलपं मतं उडुपस्तु प्लवे
चंद्रे प्रतापः स्वेद तेजसोः रक्तपो रक्तसि प्रोक्तो जलौकायांतु रक्तपा
जिकापः शुनि मार्जारे व्याघ्रचित्रकयोरपि कश्यपः स्यान्मुनौ मीनभे
दे भूमौ तु काश्यपी पादपः पादपीठे द्रौ पादुकायां च पादुका अनूपम
हिषे विंघ्याज्जलप्रायेनुवाच्यवत् आवापो भांडपवने परिक्षेपालवा
लयोः आक्षेपो भर्त्सनाकृष्टिकाव्यालंकृतिषु स्मृतः एकोत्तयाक
र्षणे गुर्भक्ता छादने च द्वयोः पृथक् आकल्पः कल्पने वेषे विकल्पो भ्रां
तिपक्षयोः कच्छपी वल्लकीभेदे दुल्लोदसुद्रगदांतरे वल्लवंधविशेषे च
कच्छपः कुणपी पुनः विस्फोटिकायां कुणपः पूतिगंधभवेपि च पच
प्राप्तरूपो बुधे रम्येप्यभिरूपः स्वरूपवत् बहुरूपः शिवे विष्णौ धून
के सरटे स्मरे द्रवधूपस्तु सरलद्रवकृत्रिमधूपयोः परिवापस्तु प
५७ र्यापौ जलस्थाने परिच्छदे उपतापस्तु रोगे स्यादुत्तापगदयोरपि

२

अनलोपस्तुगर्वेस्याज्ज्ञानेनेदूषणेपिच विप्रलापोविरोधोक्तावपार्थक
वनेपिच वृषाकपिःशिवेकृष्णेज्वलनेचवृषाकपिः परिकंपोभवेत्कं
पप्रलापःप्रेम्णयपह्नवे नीजपुष्पमेरुवकेतथादमनकेपिच हेमपु
ष्पंजपापुष्पेचंपकाशोकयोर्मितं नागपुष्पस्तुपुन्नागनागकेसर
चंपके पिंडपुष्पमशोकाचजपायांचकुशेशये मेघपुष्पंतुपिंडा
भ्रेनादेयजलयोरपि जलकूपःकूपगर्भेपुष्करिण्यांचकथ्यते
पपं भवेच्चामरपुष्पंतुचूतकेतककाशयोः फांतवर्गः फडि
रफोरववर्णेकथितःकुत्सितेवाच्यवत्पुनः शफंमूलेतरूणांस्यात्क
वादीनांखुरेपिच गुंफःस्याद्गुंफनेवाहे अलंकारेचकीर्त्यते शि
फाजटायांसरितिमांसिकायांचमातरि फांतवर्गः बवि पूर्वोरव्या
पूर्वजेंबुस्यादग्रेप्राच्येचवाच्यवत् विंबफलेविंबिकायाःप्रतिविंबे
मंडले डिंबःस्याद्विग्नेवझीकारेरेडेकुंकुमेभये स्तंबोगुल्मेतृणा
दीनामप्रकांडद्रुमेपिच शंबःस्यान्मुशलाग्रस्थलोहकुंडलकेपवौ
शुभान्वितेचखर्वस्तुह्रस्वेसंख्यांतरेपिच कंबुःशंबूकगजयोर्ग्रीवा
नलकशंखयोः जंबूःसुमेरुसरितिद्वीपद्रुमविशेषयोः कंबिरंश
चवंशस्यखजाकायामपीष्यते दर्वीभवेत्खजाकायांफणायामुर

गस्य च दार्वी दारुहरिद्रायां देवदारुहरिद्रयोः चार्वी तु शोभना
बुद्ध्यौर्ल्वाश्नीतिकान्तुवयोः बत्रि कदंबमाहुः सिद्धार्थनीप
पिनिकुरंबके कादंबः कलहंसे स्याद्विजिह्मो भुजगे खले ग
जाकारपिप्पल्यां गजांके हस्तिनापुरे नितंबो रोधसि स्कं
धे शिखरेपि कटीटके हेरंबो विघ्नराजे स्यात्कासारे शौर्य
गर्विते कलंबः सायके नीपे नालीशाके कलंब्यपि प्रलं
बो दैत्यभेदे स्यान्नालांकुरकशाखयोः प्रालंबो हारभेदेपि
त्रपुसेपि पयोधरे गंधर्वो मृगभेदे स्यात् तुंबुरुः कोकिलतुरं
गयोः अंतराभवसत्वे च गायने खेचरेपि च गोडुंबः श्रीफ
टे स्याद्गवादन्याः फलेपि च भूजंबूरपि गोधूमे विकंकत
फलेपि च ब४ लल्लज्जिका मतोधिंस्त्रे कामेत्तककुभावपि
शतपर्वा च दूर्वायां भार्गवस्यास्त्रियामपि राजजंबूस्तु जंबूभि
त्पिंडखर्जूरयोर्मता ब५ धूलीकदंबो नीपे स्यात्तिनिशो वरु
णद्रुमे गौरजंबूर्गोधूमे तथा गौरक्ततंडुले शृगालजंबू
५८ र्गोडुंबे क्कापि घोंटाफलेपि च बांतवर्गः भैकः भास्यान्न ३

वूरवेप्युक्तोनुभंनक्षत्रेप्रकीर्त्तितं भूः पृथिव्यांस्थानमात्रेस्वयंभूर्वेधसि
शार्ङ्गिणि शंभौ शुंभोयोगेप्युभंद्वेमेनिभोव्याजसदृक्षयोः ऋभुः
शिवेप्रभौनित्यैशंभुर्वृष्णाजितोर्हरे दंभस्तुकैतवेकल्केइंभोगा
लिशपोतयोः जंभोदैत्यांतरेजंभोजंबीरेभक्ष्यणेपिच कुंभःस्या
त्कुंभकर्णस्यसुतेवेश्यापतौघटे राशिभेदेद्विपांशेचकुंभंत्रिवृ
तिगुग्गुलौ कुंभीनुपाटलावारिपर्ण्यौपिठरकटकोत्ले गर्भोभ्रूणे
ऽर्भकेकुक्षेःसंधौपनसकंटके जृंभोजृंभाविकाशेच स्तंभःस्थू
णाजडत्वयोः रंभाकदल्यप्सरसोरंभोवेणौवंशदंडके सभास्त
म्भाजकेद्यूतेगोष्ठीमंदिरयोरपि शोभाकांतीछयोरुक्तादृम्भूः
:पन्नगवज्रयोः नाभिःप्राण्यंगकेक्षेत्रेचक्रांगमचक्रवर्त्तिनोः ना
भिःप्रधानेकस्तूरीमदेचक्वचिदीरितः मत्रि करभोमणिबंधा
दिकनिष्ठांतेतथोष्ट्रके करभःसरभेवाष्टापदेप्रोक्तोम्लगांत
रे ऋषभःस्वरभेदेस्यादष्टवर्गौषधेवृषे श्रेष्ठार्थेचवराहस्य
पुच्छरंध्रेकर्णयोः ऋषभीःशूकशिंब्यांस्यान्नरकारस्त्रियामपि
विधवायांशिरालायांवृषभःपुंगवेवृषे वल्लभोदयितेऽध्य

द्वेकुलीनेऽप्येपि वल्लभः दुर्ल्लभः कच्छुरे द्वयो दुःप्रापे वल्लभेपि च
नीकुंभः कथितो दंत्यां कुंभकर्णसुतेपि च कुसुंभो हेमनीमतार्ज्ञ
ने च कमंडलौ विष्टंभः प्रतिबंधे च वैदर्भे च प्रयुज्यते विस्रंभः के
लिकलहे विश्वासे प्रणये वधे विष्कंभो योगभेदे स्यात्क्षेस्तार
प्रतिपन्नयोः रूपकांगप्रभेदे च बंधभेदे च योगिनां ककुभो रा
गभेदपि वीणार्गर्जुनपादपे आरंभस्तु त्वरायां स्यादुद्यमे
वधदर्पयोः सुरभिश्चंपके स्वर्णे जातीफलवसंतयोः गंधो
पलेसौरभेय्यां शल्लकीमातृभेदयोः सुगंधो च मतो द्वे च वा
च्य वत्सुरभिस्मृतं सनाभिः सदृशे ज्ञातावालभूर्वंधसि स्मरे
वल्मीभूः पुनर्नवायां स्याद्वे किंचुलकेपि च दुंदुभिर्दितिजे भेर्यां
मक्षविंदुत्रिकद्वये वैदर्भवाक्यवक्रत्वे वैदर्भ्यस्त्रन्तरे ग
र्द्दभो गंधभेदे स्याद्गर्द्दभे कैरवेपि च गर्द्दभो गर्द्दभी त्वप्रशेगजं
तुविशेषयोः ककुभे शोभादिरोः शास्त्रप्रवेण्यां चंपकस्रजि
भव आवष्टंभः सुवर्णे च स्तंभप्रारंभयोरपि शातकुंभं सुवर्णे
५८ स्याच्छातकुंभोऽश्वमारके भांतवर्णाः भेकः मः शिवे मारमायां
च मानिषधे व्ययं मतं किमुवितर्कपरिप्रश्नेक्षेपनिंदाप्रकार

योः मध्ये दमस्तु दमने दंडे कर्दमे मदनेपि च गमो द्यूतप्रभेदे स्या
दपर्यालोचिते ध्वनि द्रुमस्तरौ पारिजाते द्रुमः किंपुरुषेश्वरे
भ्रमो भ्रांतौ कुंदाख्ये मेधातौ कुंदारख्या स्त्री लिपियंत्रके भ्रमरी ते नुया
रेवचंदने पि विदुः रमः कांते रमाल दृस्यो रक्ताशोक द्रुमे स्मरे
यमो दंडधरे ध्वांक्षे संयमे यमजे पि च शरीरसाधनापेक्षा नित्य
कर्मणि चोच्यते क्रमः शक्तौ परिपाट्यां क्रमस्खलनकंपयोः क्षौ
मं मट्टे दुकूले स्यादतसी वसने पि च क्षेमं स्यान्मंगले लब्धरक्ष
णे चौरके पि च क्षमा धन हरी गोर्य्योः क्षमः क्षातः क्षमान्विते क्षि
ति क्षांत्योः क्षमा प्रोक्ता क्षिते शक्ते च वाच्यवत् आमो रोगे तद्विरोध
आमाय पक्वे पि वाच्यवत् कामः स्मरे अभिलाषे च कामं रेतो विला
स अव्ययं तव्यनुज्ञायां यामस्तु प्रहरे व्रते श्यामः स्यान्मेचके
वृद्धदारके हरिते घने वटद्रुमे प्रयागस्य श्यामः श्यामा कगुग्गु
लौ अप्रसूतांगनायां च तथा सोमलतौषधौ त्रिवृत्ता सारिवा दू
र्वा नीनीरा कृष्णा प्रियंगुषु श्यामा नील्यां पिके श्यामं मरिचे लवणे
तरे ध्यामो दमनके गंधतृणे श्यामे मेघे यवत् गुल्मः स्तंबप्लीह
घट्टसैन्ययोः सैन्यरक्षणे गुल्मी स्यादामलक्यां लावनिकावस्त्रवे

श्रमस्तु जाल्मः स्यात्पामरे क्रूरे जाल्मोऽसमीक्ष्यकारिणि ग्रामः स्वरे
संवसथे वृंदे शब्दादिपूर्वकः भीमोम्लवेतसे शंभौ घोरे चापि वृको
दरे भौमः स्यान्नरकेंगारे सामो दंडपलाकयोः भामः क्रोधे रवौ दी
प्तौ धूमो नगारदग्धयोः युग्मः संग्रामधनुषोरिध्मः कामवसंतयोः
तोकं तु कर्णभूषणे तोकन्ता हरिते च हरिद्वर्णे रुक्मं च कांचने लोहे वर्म्म
दंशे च पौरुषे धर्म्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ उपमा
यामहिंसायां चापे चोपनिषद्यपि घर्मः स्यादातपे ग्रीष्मेऽप्युष्मस्वेदां
भसोरपि जिह्मस्तु कुटिले मंदे जिह्मं तगरपादपे सूक्ष्मं स्यात्कतके
ध्यात्मे चाणौ सूक्ष्मोऽल्पके न्यायवत् भीष्मस्तु भीषणे भद्रे गांगेये च
निशाचरे सुष्मं तेजोर्कयो रुक्मं सूक्ष्मं क्षीरे नभस्यपि दमस्तु यमा
ने स्याद्दपि चौरे तु तापने रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे
राघवे वासिते स्वेते मनोज्ञेपि च वाच्यवत् रामांगना हिंगुलिन्यारा
मे वास्तुकं कुष्ठयोः वामं सव्ये प्रतीपे च द्रविणे जातु सुंदरे पयोधरे
हरे कामे विंध्या वामा मापि स्त्रियं वामी श्रृगाली वडवा रासभी करभी
षु च पद्मः स्यात्पद्मनागव्यूहनिधिसंख्यांतरं वुजे पद्मके विंदुजालेपि
६० पद्माभाग्यालिस्त्रियोरपि सोमः कुबेर पितृदेवतायां वसुप्रभेदे च सुधा

60

करेच दिव्यौषधीश्यामलतासमीरकर्पूरनीरेषुचवानरेपि भूमिः
स्थितौस्थानमात्रेवमितीतौहुताशने रश्मिरंगेप्रग्रहेचयामिःस्वस
कुलस्त्रियोः नेमिस्त्रिकायांकूपस्यचक्रांतेतिनिशाद्रुमे नेमःकालेव
धौगर्तेप्रकारेकैतवैपिच कृमिःस्यात्क्रिमिवत्कीटेलाक्षायांकि
मिलेरवेरे कामिःस्यात्कामुकेरन्यांतोऽमिःस्त्र्यग्निपावके ऊर्मिस्त्र
रंगेपीडायांवेगेभंगप्रकाशयोः उत्कंठावस्त्रसंकोचेत्लेखयोरपि
कीर्तिता लक्ष्मीःश्रीरिवसंपत्तिपद्माशोभाप्रियंगुषु कर्णीफलासे
पद्माधीत्लोल्मुञ्चामुदीरिता शमीसक्तुफलायांचशंवायामपिवाखु
रो ब्राह्मीभारतीसोमवल्लरीब्रह्मशक्तिषु फंजीकापंकगण्डिकाश
कभेदेषुचस्मृता सामावर्षसमंतुल्येसाद्योचसदृशेन्यवत् मध्यम
~~:स्यात्स्वरेमध्येमध्यदेशेचमध्यजे~~ सीमाघाटस्थितौक्षेत्रेमर्यादावेल
योरपि हुमातसीनीलिकयोरुमानाम्निपरिष्कुतो उमातसीहैमवती
नारिद्राकीर्तिकांतिषु रुमासुग्रीवदारेषुविशिष्टलवणाकरे मत्रे
उत्तमादुग्धिकायांस्यादुत्कृष्टेचोत्तमेन्यवत् मध्यमःस्यात्स्वरेम
ध्येमध्यदेशेचमध्यजे वाच्यवन्मध्यमातूक्ताराकाद्रष्टरजास्त्रियोः
कर्णिकाज्यहरंछदःकरमध्यांगुलीषुच अधमःकुत्सितेन्यूनेप्रक

मोवसरे क्रमे विक्रमः क्रांतिमात्रे स्याद्विक्रमः शक्तिसंपदोः संक्रमः क्रम
णे सम्यग्ग्रादिसंचारिपंत्रके निःक्रमो बुद्धिसंपत्तौ निष्क्रमे दुःकुलेपि
च आगमः शास्त्रसंघाते विभ्रमो भ्रांतिहावयोः संभ्रमः साध्वसेपि
स्यात्संवेगादरयोरपि विद्रुमो रत्नवृक्षेपि प्रवालपल्लवेपि च आ
श्रमो ब्रह्मचर्यादिचतुष्केपि मठेपि च सत्तमश्चान्यवत्पूज्ये श्रेष्ठसा
धीयसोरपि नियमो यंत्रणायांच प्रतिज्ञायांच संयमे निगमो वाणि
जे पुंसि कटे वेदे वणिक्पथे नैगमः स्यादुपनिषद्वणिजे नापिते
शालिकालक्रमोश्च
पि च कलमो लेखनी चौरसलिलाहारकेषु च तल्लिमं कुट्टिम
तल्पे चंद्रकांतासे वितानके परमं स्यादनुज्ञानेव्ययं परमः परो परमं
स्यात्प्रधानाद्योरोंकारेपि तथाच्युते कुसुमं पुष्पफलयोः स्त्रीर
जोनेत्ररोगयोः कृत्रिमं रचिते प्रोक्तं सिल्हके लवणांतरे सुष
मं चारुसमयोः सुषमा परमद्युतौ सुखीमः शिशिरे चारो सु
खीमः पन्नगांतरे पंचमो रागभेदे स्यात्पंचानामपि पूरणे पं
चमश्चतुरे हृद्ये पंचमी पांडवस्त्रियां गौतमः शाक्यसिंहेपि मु
निभेदे च गौतमी रोचन्यां मंविकायांच दाडिम करवीलयोः गो
६१ धूमो नागरंगे स्यात्द्वेषजड्वीहिभेदयोः व्यायामो दुर्गसंचारे वि ६

क्रमेपोस्थेपि च विलोमस्तु प्रतीपे भुजंगे वरुणे मुनि आमलक्यां वि
लोमी च विलोमं चारघट्टके गोलोमीश्वेतदूर्वायां वचायां वारयोषि
तोः प्रतिमा दंतबंधे स्याद्गजस्यानुकृतावपि मच प्लवंगमः कपो
भेकेऽनुपमः सुंदरेऽन्यवत् सुप्रतीकस्य घोषायां भवेदनुपमापि
च अभ्यातमोंतिके घाते विरोन्नाद्रमाश्रिषु यातयामस्तु जीर्णे स्या
त्परिभुक्तोज्झितेपि च दंडयामस्तु कीनाशे दिवसे कुंभसंभवे सार्व
भौमश्च दिग्नागे सर्वपृथ्वीपतावपि पराक्रमो विक्रमे स्यात्साम
र्थ्योद्योगयोरपि उपक्रमः स्यादुपधा चिकित्सारंभविक्रमे जल्गु
ल्मो जल्लावर्तैकच्छपे जल्लचत्वरे महापद्मः स्मृतो नागनिधिसं
ख्यांतरेषु च भयं अभ्युपगमः स्वीकारे समीपागमनेपि नदग्रने
ऽः शीतांशोरवस्थां च धृवेक्षात्वेन् मांतवर्गः येकः यः सर्वना
मानिलयोर्यामो र्वीमात्रभूमिषु धुरर्कैवक्तौ दिवसद्यौः स्वर्गे
सुरवर्त्मनोः यश्चि जयो जयंते विजये जया दुर्गातिनिमेषयोः
जयंती तिष्ठिभेदो मासरवीपथ्यासु च स्मृता वयः समूहे प्राका
र मूलबंधे समाहतौ नयो नीतौ द्यूतभेदे शयः शय्याफिपाणिषु
भयं प्रतिभये घोरे प्रसूनेकु त्रुकस्य च भयः शिल्पिनि देत्यानां क

रभे) श्वतरेऽपि च लयो विलासे संश्लेषे साम्ये तौर्यत्रिकस्य च स्मयो ग
र्वेऽद्भुते गेयो गातव्यगायनेऽपि च क्षयो रोगान्तरे वेश्मकल्पान्तापचये
षु च प्रियो धवे च हृद्ये च वृद्धिनाम्नौषधेऽपि च कायः कदेवते मू
र्त्तौ संघे लक्ष्यस्वभावयोः कायो मनुष्यतीर्थेऽपि सायः कांडपराह्नयो
: दायो दाने यौतकादिधने सोल्लुंठभाषणे विभक्तव्यपितृद्रव्ये दाय
माहुर्मनीषिणः प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि पेयं पा
तव्यपयसोः पेया श्राणाच मंडयोः स्थेयो विवादस्य पदनिर्णेतरि पु
रोहिते पीयुः काले रवौ घूके पयुः क्रतुमयोमये मयुस्तुरंगवदने मृ
गेऽपि मयुरिष्यते मन्युः क्रोधे क्रतौ दैन्ये मृत्युर्मरणदेवयोः दस्युः
स्तेने च शत्रौ च जन्युः प्राण्यग्निघातृषु वन्यं वनभवे वन्या वल्लावा
रिसमूहयोः जन्यं हेयपरीवादे संयुगे जनकेऽपि यः जन्यः स्याज्जननी
ये च जन्या मातृसखीमुदोः जन्यो वरवधूज्ञातिप्रियभृत्यहितेऽपि च
शून्यारख्यानिर्जने नन्या मन्यो भिन्नसमानयोः पथ्यं पानीयके नैं
घे पूज्यः श्वशुरवंद्ययोः हार्यो विभीतकतरौ हर्त्तव्ये हार्यमन्यवत्
वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि आर्यः स्वामिनि वैश्ये च का
६२ र्यं हेतौ प्रयोजने सूर्यः सूरे तत्स्त्रियायां सूर्या स्यादोषधावपि शौर्य

चारभटीशाक्तोर्वर्ल्हीः स्मरवरेण्ययोः गुरुं स्याद्धस्तपुष्ये च गुरुत्वकच्छाव
दंतयोः सहस्रं शैलांतरारोग्यसारहेव्योष्णु च कथ्यते गरुत्वं पुरीषभोगेपि
भेदस्वैरिपक्षयोः गरुत्वं च शाखानगारेग्रहस्थेकपशुदीरितः योग
प्रवीणयोर्योगिनामपायशक्तेष्वेवाच्यवत् योगमरुद्वारव्यामेषड्यायोगाभ्या
सार्कयोश्चितोः भाग्यंशुभात्मकविघ्नोस्याच्छुभाशुभकर्मणि पा
कंच विडारव्यलवणपवहारेपिदृश्यते पंच्य नितेहरीतकांपथ्यार
थ्यारथोहर्हे रथ्यारथ्योघे विशाखावर्त्तनीच त्वरेषु च श्रेष्ठ्यशिला
जनुन्यर्थ्यावुधेन्याये तुवाच्यवत् ग्राम्यौजल्लेन्यवक्राम्यमश्लीलवध
बंधयोः सोमेवुधेमनोज्ञेस्यादनुगेसोमदेवते दुर्ल्लभलतासु चसौम्या
:स्पुर्नीचेवगाधे च वाच्यवत् रम्यंमनोरमेरम्याणत्रौरम्यक्रचंपके सं
ख्यंसमितिसंख्यादेकत्वादिविचारयोः मध्यं नाय्यवकाशे च लग्नके
चांतरेधमे मध्यं शुचौमेदुरेत्ववाच्यवन्मध्यमाश्रये साध्याभिख्या
साधनीयगणदेवतयोगयोः वंध्यो फलंद्रुमेवंध्यात्वप्रजातस्त्रिया
मपि हृद्यंधवलजीरेच हृत्प्रियेहृद्भवेपि च वशाकृद्वेदमंत्रे च हृद्योव
ध्याख्यमेषजे दोघ्यं स्याद्भुजेप्रश्नेचोदनार्हे च वाच्यवत् पद्यं श्लोके
श्लतोपाद्यं पयः श्लेष्ठे नितद्यते पुण्यं मनोज्ञेभिहितेतथा सुकृते तथर्मयोः
हो।

धिष्ण्यं सद्मनि नक्षत्रे स्थाने शक्तौ च पावके धान्यं व्रीहिषु धन्याके
धन्यः पुण्यवति स्मृतः धन्या धात्र्यामलक्योऽस्त्री कुंठ्यं भिन्नो विल्ले
पने काव्यं ग्रन्थे ग्रन्थकाव्यः काव्या स्यात्पूतनाधियोः चव्यं तु चवि
के च व्या शतपर्वीग्रंथ्योः गव्यं तु गोभिते गव्या ज्यायां क्षीरादिके
गवां नाग द्रव्ये तु गव्या तु गोकुले कथिता बुधैः द्रव्यं स्याद्द्रविणे भव्य
रथ्यव्यादौ च पित्तले भेषजे दविनेयेकरु मुद्रुमविकारयोः तथ्यं
सत्ये शुभे चाथ भव्यो च योग्य भाविनोः कर्मिरंगतरो भव्यो भव्या क
रिकणाभयोः दिव्यं लवंगे दिव्यं तु वल्लो दिविभवेन्यवत् आमल
क्यां मतादिव्या सव्यं वामप्रतीपयोः सेव्यं प्रोक्तमुशीरे च सेव्यो र्हि पुन
रन्यवत् गोप्यो दासीसुते गोप्यो रक्षणीये भिधेयवत् रूप्यं स्या
दाहतस्वर्णे रजते रजतेपि च रूप्यं प्रशस्तरूपे च वाच्यवत्समुदीरि
तं दूष्यक्षाद्येकरे एकवाच भवेदिष्या तु शल्ये शल्यको लभ्यं युक्ते
च लभ्य वाच्यमर्वाहयोग्ययोः चैत्यं मृतकचैत्ये स्याच्चैत्यो मृत
चेतावपि चैत्यमायतने बुद्धे विंध्यं चोद्देशपादपे दैत्योऽसुरसुरा
यां तु दैत्या चंडोषधावपि भृत्यो दासे भृतो भृत्या स्यादंत्यां तेगव्य
६९ धमे सत्यं शपथे तथ्ये कृते तत्तद्वति चान्यवत् वणाल्लोका त्यरसत्या ८

नित्यं तु सतते ध्रुवे मूल्यं तु वेतने च स्यान्माल्यं मालाप्रसूनयोः वल्यं
प्रधानधातौ स्याद्वल्यं वल्कके ऽपि च कल्यं शस्ये प्रभाते च कल्यो
नीरोगदक्षयोः कल्या कल्याणवाचि स्यात्कादंवर्यामपि स्मृता
शल्यं शङ्कौ शरे वंशकं विकायां च तोमरे शल्यश्च कथितः स्याद्वि
न्मदनद्रुमयोरपि कुल्यः कुलोद्भवे मान्ये कुलस्यापि हितेपि च
कुल्यं स्यात्कीकसे स्पृष्टे द्रोणीसूर्प्यामिषेषु च पयःप्रणाली सरितो
ःकुल्या जीवन्तिकौषधे वेश्यं वेश्यागृहे वेश्या गणिकायामुदीरि
ता आस्यं वक्त्रे वक्त्रमध्ये स्तुतौ वा स्याच्च विश्रुता लास्यं तौर्यत्रिके
नाट्ये सस्यं शस्ये फले गुणे कक्ष्यं मध्ये तुरंगाणां कक्ष्यं मद्यकरा
ञियोः कांस्यं तैजसद्रव्ये स्याद्वाद्यभित्पानपात्रयोः मत्स्यो मीनांत
रे मीने विराटे मुख्ययादवे तिष्यः पुष्ये कलौ धात्र्यां तिष्या पुष्यव
दिष्यते दूष्यं तु दूषणीये स्याद्दूष्यं वस्त्रे च तद्गृहे दीद्यं तु विस्मये
दृश्ये वीद्यो वासकवाजिनोः तार्क्ष्यः स्यादश्वकर्णाख्यवृक्षे रथतु
रंगयोः तार्क्ष्यं रसाञ्जने तार्क्ष्यो गरुडे गरुडाग्रजे लक्ष्यं शरव्ये संख्या
यां लक्ष्यं स्वच्छद्मसंमतः याम्या पाच्या भरण्यां च याम्यो ऽगस्त्ये च चं

दने वृत्यादाने ध्वरे चौर्यां स्त्रीनेवृत्यो गुरोमते कन्याकुमारिकाना
र्योः राशौ षधीराभिभेदयोः कद्याव्रतिकायां स्यात्कोष्ठामध्ये
- वेधने तम्ब्यादीनां प्रकोष्ठे च कृत्यं विविष्ट कार्ययोः कृत्यापि
देवताभेदे कृत्यास्त्त्यादिषु स्मृता विंध्यातुलवल्यां स्याद्धिं
ध्यो व्याधादिभेदयोः संध्यापितृप्रसूने ध्योश्चिंतामर्यादयोरपि
प्रतिज्ञायां च संधाने संध्या च कुसुमांतरे छायास्यादातपाभावे
प्रतिबिंबार्कयोषितोः पालनोत्कोचयोः कांतिस्वछाभापंक्तिषुस्मृ
ता क्रियाकर्मणि चेष्टायां कारणे संप्रधारणे आलंभोपायशिक्षा
षासु चिकित्सानिष्कृतिष्वपि मायादंभे कृपायां च मायः पीतांबरे
वरे त्रयी त्रिविद्या त्रितये पुरध्र्यां सुमतावपि यती विजयासुत
या पार्थे गौर्यां तु विजया तिथौ विनयं प्रणते प्राहुः शिक्ष्यायां विनया
पुनः विषयास्यादिंद्रियार्थे देशे जनपदेपि च गोचरे च प्रधानाद्यो
यस्य ज्ञातः सततस्य च अनयो व्यसने दैवे चाशुभे चापदि स्मृतः
सन्नयः समवाये स्यात्स्पृष्टस्यापि वल्लेपि च प्रणयः प्रश्रिते विश्रंभे
64 याच्ञाप्रणययोरपि वलयः कंठरोगे स्याद्वलये कंकणेपि च मल
यादेशआरामे शैलांशे पर्वतांतरे मलयात्रिवृतायां स्याद्विस्मयो
६४ द्भुतगर्वयोः प्रलयो मृत्युकल्पांतमूर्छायेषु प्रयुज्यते अभयं स्या २

दुश्चरित्रेच पथ्यायामभयामभयं निर्भयेवाच्यवत्क्रोडं हृदयं मानसोरसो
ः वृद्धायामुदयः पूर्वपर्वते चोन्नतावपि प्रत्ययः शपथे रंध्रे विश्वासा
चारहेतुषु प्रथितत्वेच सरणो चाधीनज्ञानयोरपि अत्ययोतिक्रमे दंडे
विनाशे दोषकृच्छ्रयोः आशयः स्यादभिप्राये पनसाधारयोरपि निका
यो निलये लक्ष्ये संयतानां समुच्छ्रये एकार्थभाजि निवहे परमात्मनि चे
ष्यते क्षेत्रियं क्षेत्रजे तृणे परदाररतेपि च अन्यदेहस्थचिकित्सार्हे साध्य
रोगेच जातने कषायो रसभेदे स्यादंगरागे विलेपने नियासे च कषायो
ऽमधुर मौल्लोहिते न्यवत् कुलायः पक्षिनिलये नीडं पक्षिवन्मतः उ
पायः सामभेदादावुपायः स्यादुपागतौ पर्यायस्तु प्रकारे स्यान्निर्माणे
वसरे क्रमे संस्त्वायः संनिवेशे स्यात्संस्थाने विस्तरे तावपि व्यवायो
मैथुने तर्द्धाव्यवायं तेजसि स्मृतं शाल्लेयं शतपुष्पायां आत्मनात्यक्त
वावपि शैलेयं सिंधुलवणे तालपर्ण्यां च शैलजे चंचरीकेतु शैलेयो
गांगेयो जाह्नवीसुते कसेरुस्वर्णमुस्तेषु गांगेयमिति कथ्यते चांपे
यं चंपके स्वर्णे किंजल्के नागकेसरे कालेयो दैत्यभेदे स्यात्कालेयं का
लखंडके चालेयांगारवल्लर्यां खल्वे च कलिमिति तेमते आत्रेयो मुनिभेदे
स्यादात्रेयी सरिदंतरे आत्रेयी पुष्पवत्यां च पानीयं पुष्पवारिणोः ए

णयमेणी च स्मिाद्यैरतवेधांतरे स्त्रियाः आत्मीयमस्य संघाते स्वीयमस्य
कितेन्यवत् इंद्रियं च हृषीके स्यादिंद्रियेरेतसि स्मृतं जघन्यं चरमे श्री
घ्रे जघन्यं गर्हितेन्यवत् ब्रह्मण्यो ब्रह्मसाधौ स्याद्ब्रह्मण्यस्तु शनैश्चरे
ब्राह्मण्यं ब्रह्मणत्वे स्यात्समूहे पि द्विजन्मनां शीर्षण्यमाहुर्विश
दे केशे शीर्षकयोरपि हिरण्यमक्षये द्रव्ये वराटे स्वर्णरेतसोः सौ
कर्यं स्यादनायासे क्रियायां सूकरस्य च स्वसुर्यो देवरे श्याले प्य
नार्यं स्थिरशैलयोः प्रकीर्यं पूतिकर्णे च विनिकीर्ये तु वाच्यवत्
सौरभ्यमाहुः सौगंध्ये चारुत्वे गुणगौरवे नेपथ्यं रंगभूमौ स्यान्ने
पथ्यं च प्रसाधने आतिथ्यमातिथेये स्यादातिथ्यस्त्वतिथावपि
सामर्थ्यं योग्यताशक्त्योरपत्यं पुत्रयोर्मतं कौकृत्यमनुतापे स्याद्दु
ष्कृतकरणेपि च लौहित्यः सागरे ब्रीह्यावादित्यस्त्रिदशे रवौ पौलस्त्यो
रावणे श्रीदे वैद्यो द्वैतं सत्यभोगयोः प्रसव्यमनुकूले स्यात्प्रतिकूले च
वाच्यवत् अवध्यमवधार्हे स्यादनर्थकवचस्यपि प्रणाय्यो संमते
प्राज्ञे प्यभिलाषविवर्जिते शांडिल्यो मुनिभेदे स्यान्माल्लूरे पावकां
६५ तरे मंगल्यमुद्गमाषे स्याद्बिल्वे स्वच्छे मसूरके मंगल्यं दधिमंगल्यो 1.

मनोह्वेत्वभिधेयवत् मंगल्या रोचनायां स्यात् प्रियंगुशतपुष्पयोः
अधःपुष्पीशंखपुष्पीशमीशुक्लवचासु च अधृष्यस्तु प्रगल्भे स्या
द्धृष्या निम्नगाभिदि पारुष्यं पुरुषत्वे स्यात् वने शक्रस्य गीयते
पारुष्योऽथ भुजिष्यः स्यात्सनाये हस्तसूत्रके स्वतंत्रे तु भुजिष्या स्या
द्दासीगणिकयोरपि चक्षुष्यं केतके पुंडरीके च हेरसांजने कुलत्थि
कासु भगयोश्चक्षुष्या च मितेन्यवत् जरायुर्गुग्गुलतरौ जरायुर्वि
सर्गांतरे ऊर्णायुः उरणभेदे स्यान्मेषकंबलमेषयोः देवयुर्धार्मि
के ख्यातो देवयुर्लोकपात्रके मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याध
योरपि भुवन्युर्ज्वलने भानौ भुवन्युः शशलांछने शरन्युर्वीरे
देवाते द्विपण्युः सुरभौ तनौ तपस्या व्रतचर्यायां तपस्यो मासि फा
ल्गुने रहस्या निम्नगाभेदे गोपनीये तु वाच्यवत् पयस्या क्षीर
काकोल्यां पयोमितभवेन्यवत् पयस्या दुग्धिकायां च स्वर्णक्षी
र्यां च कथ्यते स्याद्रहस्या सरोभेदे गोत्रमस्य च योष्ठिते विश
ल्यालांगली दंती गुडूची त्रिपुटासु च अभिख्या कीर्तियशसो
रभिख्या नामशोभयोः द्वितीया तिथिभित्पत्न्योः पूरण्यामपि च

दयोः नादेयी नागरंगे स्याज्जयायां जलवेतसे भूमिजंब्वां जपा
यां च कांगुष्ठेपि समीक्ष्वते यत्र मेवदनुशये द्वेषे पश्चात्तापानु
बंधयोः स्मृतः समुदयो द्वंद्वे संयुगे समुपक्रमे प्रतिश्रयः स
भायां स्यादाश्रयेपि प्रतिश्रयः समुच्छ्रयः स्यादुत्सेधे विरोधे
पि समुच्छ्रयः हिरण्मयो लोकधातौ स्यात्सुवर्णमयेन्यवत्
अवश्यायो हिमे गर्वे समुदायो गणे युधि परीहायो जलस्थाने प
रिच्छदनितंबयोः संपरायो समीके स्यादापदुत्तरकालयोः
निरामयो न्यवल्कत्वे स्याद्दिरिके निरामयः समाह्वयः स्यात्सं
ग्रामे द्यूते च पशुपक्षिणाम् महालयो विहारे स्यात्तीर्थे च परमात्म
नि रौहिणेयो भेवद्वत्से रेवतीरमणे बुधे पौरुषेयो विकारे
स्यात्पुरुषस्य पदांतरे पुंसः समूहवधयोः पुरुषेण कृतेपि च
भागधेयं स्मृतं भाग्ये भागप्रत्यययोरपि विलेशयो मूषके स्या
द्भुजंगेपि बिलेशयः जलाशयमुशीरे च जलाधारे जलाशयः
चंद्रोदयो वितानेस्यात्तथा चंद्रोदये पि च फलोदयः स्यात्त्रि
६६ दिवलाभेपि च फलोदयः महोदयः कन्यकुब्जे व्याधिपक्षाय ११

66

फं च ज न्योः प्रदेः शरवे शंरवे पोर गालेने नले

वर्णियोः स्थूलोच्चस्त्वसाकल्यगण्डोपलवरंडयोः गजानां मध्यमगते स्थूलो
च्चयउदाहृतः धनंजययोर्जुनेन न्नौककुभे देहमारुते नागांतरे चापस
व्यं दक्षिणप्रतिकूलयोः मार्जालीयः स्मृतः शूद्रे विडाले कायशोधने तं
दुलीयः शाकभेदे विडंगतनुताप्ययोः तृणशून्यं मल्लिकायां केतक्यां च
केलेमतं महामूल्यं महार्घ्येस्यात्तच्छरागमणावपि श्रृंतरायामतो
भूमिशय्यायां स्पित्रकानने उपकार्या राजसद्मन्युपकारोचितेन्यवत्
यपं दुग्धतालीयमिति ख्यातं दुग्धाग्रे दुग्धफेनके भवेत्स्वचनीयारव्या
प्रतान्ताेत्ये चक्रनिरे कालानुसार्य्यकालेयेशैलेये सिंसपाक्रमे वृषाक
पायीश्रीगौर्य्योर्जीवंत्यां च शतावरी यवट्र प्रत्युद्गमनीयमुपस्थेयेधौ
तांशुकयोः विष्वक्सेनप्रियाल्लक्ष्म्यां त्रायमाणौषधावपि यातवर्णः
रैकः रःपावकेचतीक्ष्णे चराः स्मृतः स्वस्तिकेद्वित्वयोः स्मृतस्तु वैनिर्ऋ
रे चापिद्रूः स्वर्णलेकामरूपिणि श्रीविष्टरचनाशोभाभारतीसरलद्रुमे
लक्ष्म्यां त्रिवर्गसंप्राप्तौ वेषोपकरणे मतौ रद्वि अरंशीघ्रे चक्रांगे शी
घ्रगे पुनरन्यवत् करीवर्षोपलेपाषाणे शुण्डाप्रत्यायरश्मिषु स्वरः स्यात्
द्रुमे देवताडे तीक्ष्णाग्रके पि च गरोव्याध्यनुपविषे विषे च करणे गरं

वरो घृतप्रभेदे स्याज्झारं जंगमयोश्चले नरं तु रामकर्पूरे नरो जेमानवेऽर्जुने
परः स्यादुत्तमानात्मवैरिदूरेषु केवले परमव्ययमिच्छन्ति भरोऽतिशयभार
योः वरो भीष्टदेवतादेर्वरो जामातृषिङ्गयोः श्रेष्ठे न्यावहदाव तौ वरं
काश्मीरके मतं त्रिफलायां वरा प्रोक्ता शतावर्यां वरीवरा अव्ययं तु मना
गिष्टे शरो दध्यग्रवाणयोः स्वरोऽकारादिमात्रासु मध्यमादिषु च ध्वनौ
उदात्तादिष्वपि प्रोक्तः स्वरो नासासमीरणे शरं नीरे शरः काण्डे स्तेजनके
पि च धरस्तु शैलकर्पासे तूलके कमठावपि धरा मेदसि भूम्यां च स्त्री
णां गर्भाशयेऽपि च दारं नीरे दरो मेघे दरः साध्वसगर्तयोः कंदरे तु दरी
मा मुरी बदर्यां दरा व्ययं नूरः स्याच्छेदनद्रव्ये कोकिलायां च गोनूरे पुरं
पाटलिपुत्रे स्यान्नृत्यो परिरिज्यो पुरं पुरं पुरि शरीरे च गुग्गुलौ कथित
: पुरः पुरा व्ययं पूर्वकाले खुरः कोलदले शफे सुरो देवे सुरा मद्ये च
कष्टे च सुरा स्त्रियाञ्च त् कारो वधे निश्चये च बलौ यत्नेऽरतावपि कारस्तु ष
रशैले च कारः दूत्यां च सेवके बंधने वं धनाकारे हेमकारिकयोरपि चार
: पियाले वृक्षे स्याद्गतौ गंधापसर्पयोः पारं परतटे प्रान्ते पारी पात्री परा
गयोः कर्करीपूरयोः पारी पादरज्ज्वां च दन्तिनः वारः सूर्यादिदिवसे द्वारे व
६२ सरदवयोः कुब्जवृक्षे सरे वारो वारं मद्यस्य भाजने तारो मुक्तादिसंशुद्धौ १२

तरले शुद्धमौक्तिके तारं च रजते प्युच्चस्वरे प्यन्यवदीरितं तारा ऽक्ष्णोर्मध्यगो
स्तारा सुग्रीवगुरुयोषितोः बुद्धदेव्यां मता तारा शरः शबलवातयोः भार
स्तु वीवधे स्वर्णपलानामयुतद्वयोः मारो मृते ऽवघ्ने नगे मारी चंड्यां जनक्षये
स्फारं स्याद्विकरे स्फारः फरकादेश्च बुद्बुदे नारो रसांतरे धूर्ते लव
ऐकान्त्वभस्मनोः हारो मुक्तावलौ युद्धे प्यारः क्षितिसुते र्के तु आराच
र्मप्रभेदिन्यां नारं स्वर्णिकनीरयोः सारो बले मज्जनि च स्थिरांशे न्याय्ये
च नीरे च धने च सारं वरे न्यवत्सारमुदाहरंति द्वारं पुनर्निर्गमने भ्युपा
ये पूरो जलप्रवाहे स्याद्व्रणसंशुद्धिखाद्ययोः क्रूरस्तु कठिने घोरे नृशं
से त्वभिधेयवत् सूरश्चारभरे सूर्ये चौरश्चोरसुगंधयोः तीरं तटे व
यो तीरे सीरस्तिग्मकरे हले चीरं तु गोस्तने वस्त्रे चूडायां सीसके पि
च चीरे कच्छाटिकाग्रंथ्योः स्वैरः स्वच्छंदमंदयोः जीरः खड्गे वाणि
ज्यद्रव्ये नीरस्तोयधिशैलयोः क्षीरं दुग्धे च नीरे च कीरो जनपदे शुके गौ
रः पीतरुणश्वेतविशुद्धेष्वाभिधेयवत् गौरं तु विशदे पद्मकेसरे सर्षि
पे पि च गौरः शशिनि गौरी तु नग्नकन्योमयोर्मता रोचना रजनी पिंगा
प्रियंगुवसुधासु च नदीभेदे च गौरी स्याद्वरुणस्य च योषिति पौरं तु क
त्तृणे पौरः स्मृतः पुरभवे न्यवत् वरं शरीरकाश्मीरे वैरं वार्तिंगणेपि

च घोरं भीमे न्नरे घोरस्तारो लं गतुरंगयोः गोत्रा त्वेनपि राश्यपृष्ठैशा
स्त्रेरखाभिदोरपि गौरा पिपीलिकालक्ष्म्योः गौरः संगरवज्रयोः गो
त्रं नाम्नि कुले क्षेत्रे कानने क्षेत्रवर्त्मनोः संभावनीयबोधे पि गोत्रः क्षो
णीधरेपि च गोसमूहे भुवि गोत्रा गात्रं संशोकलेवरे गात्रं गजाग्रजं
घादिविभागेपि समीरितं पत्त्रं स्याद्वाहने पर्णे पक्षे च शरपक्षिणां
— च पात्रं भाजनयोग्यत्वे पात्रं तीरद्वयांतरे पात्रं स्रुवादौ पर्णे च राजमंत्रि
णि च ख्यते पोत्रं वस्त्रे मुखाग्रे च शूकरस्य हलस्य च पित्रं स्याद्प्रभु
तालेरख्यतिलकेषु विनायसि पैत्रा ब्रुकपर्णी गोदुग्धासु भद्रादं
तिकासु च रुद्राप्सरोभेदे च कर्वुरे चाभिधेयवत् चैत्रं मृतकचै
— स्याच्चैत्रो मासाद्रिभेदयोः छत्रो रिपौ घमध्वांते शैले शक्रे च दान
वे सत्त्रमाच्छादने यज्ञे सदादाने च केतवे सूत्रं तु सूचनाग्रंथे सूत्रं
तंतुव्यवस्थयोः मित्रं सुहृदि मित्रोर्के शास्त्रं ग्रंथनिदेशयोः मात्रं मा
68 वध्तौ कार्त्स्न्ये मात्रा कर्णविभूषणे अक्षरावयवे द्रव्ये माने ल्पे च परि
च्छदे शस्त्रं लोहास्त्रयोः शस्त्री छुरिकायां च विश्रुता अस्त्रं प्रहरणे
६८ चापे वक्त्रं छंदोंतरे मुखे नेत्रं पथि गुणे वस्त्रे तरुमूले शिफा लोचने नेत्रं र १३

ऐच्चनचर्यांचनेत्रोनेघरिभेद्यवत् तंत्रंशरीरकेद्वारेसिद्धस्थानकलत्रयोः
रैत्रंरतासिपीयूषेवरत्वासेपिसूतके मंत्रोवेदप्रभेदेस्याद्देवादीनां
चसाधने [illegible] गुह्यवादेचमोत्रंतुप्रजनेचेणकेपिच तंत्रंकुटुंबकृ
त्येस्यात्कारणेचपरिच्छदे शास्त्रप्रधानेसिद्धांतेतनुवायेगदं
तरे तथाद्विसाधकोपायेश्रुतिशाखांतरेपिच इतिकर्तव्यता
यांच तंत्रीवीणागुणेतनोः शिरायामप्यतायांच छत्रमातपवा
रणे छत्रामधुरिकायांस्यात्कुस्तुंबुरुशिलींध्रयोः चक्रांगणे
चक्रवाकेचक्रंसैन्यरथांगयोः ग्रामजालेकुलालस्यभांडेराष्ट्रा
स्त्रयोरपि अंभसामपिचावर्ते चुक्रस्त्वम्लेम्लवेतसे चुक्रांगेरि
कायांचवृक्षाम्लेचुक्रमिष्यते शुक्रःकाव्येनलेज्येष्ठेशुक्रंरेतोक्षि
रोगयोः शक्रःशास्तोमहेंद्रेस्यात्कुटजार्जुनभूरुहोः नक्रःकुंभी
रकेनक्रंरासायामग्रदारुणि वक्रःस्यात्कुटिलेक्रूरेपुरभेदेश
नैश्चरे अग्रमालंबनेव्रातेपरिमाणेपलस्य प्रांतेपुरस्तादधि
कप्रधानेप्रथमोर्द्ध्वयोः उग्रःशूद्रासुतेरुद्रेस्त्रीकंठेचोत्कटेन्यव
त् उग्राबचावच्छिक्काकयोर्व्यग्रोव्यासक्तव्याकुले मंद्रस्यात्मंगले

ऽन्निमुस्तके करणांतरे भद्रो भद्रे वृषे राम चरे मेरुकदंबके ह
स्तिजात्यंतरे भद्रो वाच्यवल्लिंगं तु साधुनोः भद्रा मंदाकिनी रास्ना
कृष्णावृंतासु पासु च गोगरीव्रतती शिंस्रा मक्षिका मात्रकेषु च
क्षौद्रं मधुनि पानीये वध्रं पुत्रवरत्रयोः गृध्रः खगांतरे गृध्रा
च्यवल्लिंगे तु लुब्धके रोध्रः शाबरके रोध्रम् अपराधे च किल्बिषे
नीध्रं नेमौ वल्मीके घ्रौ रेवतीभे पिकानने राध्रं मुद्दिष्टमुत्पाते
तथा स्यादुपवर्त्तने कुंद्र मारख्यातमाभीलं तापसं तापनाद्दिनोः
चंद्रः सुधांशुकर्पूरकंपिल्लस्वर्णवारिषु इंद्रः शचीपतावंतरा
त्मन्यादित्ययोगयोः इंद्रा फणिज्जकाकेंद्रो वनकाननयोर्द्विपो
गुंद्रस्तेजनके गुंद्रा प्रियंगौ भद्रमुस्तके केवर्त्तीमुस्तके चापि
रौद्रो नाट्यरसांतरे रौद्रोतिभीष्मले तीव्रे रौद्री स्कंदस्य मातरि
उद्रो जलमवेष्टे उद्रा जनपदांतरे पिटके दारयोर्विप्रो वप्रः
प्राकाररोधसोः पुंड्रो दैत्यविशेषेक्षुभेदयोरतिमुक्तके चित्रेक
पो पुंडरीके पुंड्राः स्युर्नीवृदंतरे वज्रं हीरकदंभोलिबालु
कामलकेषु च वज्रा गुडूचिकायां स्यात्ताम्रं शुल्वे रुरोन्यवत्
६९ तीव्रमत्युग्रकटुकं नितांतं तेष्वन्यवन्नतं तीव्रा च कटुरोहिण्या १४

मासुरीगंडदूर्वयोः अस्रः कोणे शिरसिजे चास्रमस्रुणि शोणिते
दस्रः खरे चाश्विनयोर्घस्रो दिवसहिंस्रयोः वास्रोपि दिवसे वा
स्रं मंदिरे च चतुष्पथे शीघ्रं द्रुतगतो प्राहुश्चक्रांगोशीरयोरपि
व्याघ्रो द्वीपिनि विख्यातो रक्तैरंडकरंजयोः व्याघ्री निदग्धि
कायां श्लिष्टे स्यादुत्तरस्थितः अभ्रं नभः स्वर्गवल्मीकेषु मुस्त्र मे ५
प्रदीप्ते धवले भ्रकेपि बभ्रुर्विशाले नकुले कृशानौ वज्रे मुनौ
शूलिनि पिंगले च सिग्रुः शोभांजने शाके शरुः कुशलकोप
योः स्वरुर्वज्रे ध्वरे बाणे यूपखंडे च स्वरुः खरुर्दंते हरे दर्पे
हये श्वेते तु वाच्यवत् चरुर्भांडे च हव्यान्ने भरुर्भर्त्तरि कांच
गुरुर्निषेकादिकरे पित्रादौ सुरमंत्रिणि दुर्जरालघुनोरक्तौ
गुरुर्महति वाच्यवत् रुरुर्मृगे दैत्यभेदे कारुः कारकशिल्पि
नोः विश्वकर्मणि शिल्पे च कुरुः श्रीकंठजांगले उंदनेन्नप
भेदे च पुरः प्राप्तिपरागयोः पुरुः स्वर्लोकनृपयोर्मेरुर्भूधरध
न्वनोः आरुस्तरुविशेषे स्यादारुः कर्कटदंष्ट्रिणोः कद्रूर्मातरि
नागानां कद्रुः कनकपिंगले हरिर्वातार्कचंद्रेंद्रयमोपेंद्रम

रीचिषु सिंहाश्वकपिभेकाहिशुकलोकांतरेषु च हरिर्वाच्यवदा
ख्यातो हरिः कपिलवर्णयोः भूरिर्ब्रह्माच्युते शंभौ भूरि प्राज्यसुव
र्णयोः गिरिर्गीर्णौ गिरियके क्रीडागुडकशैलयोः नेत्रामयवि
शेषेऽपि पूज्ये तु गिरिरन्यवत् वारिः स्त्री तासरस्वत्यां वारि ह्रीवे
रनीरयोः वारी घटीभबंधन्योः रंहिः स्यात्स्यादबुध्नयोः सा
रिरक्षोपकरणे तथा शकुनिकांतरे युद्धार्थगजपर्याणे व्यवहा
रेषु च क्वचित् कारिः क्रियायामाख्याता नापितादिकशिल्पि
नि अद्रिः शैलद्रुमार्केषु द्रिः काकतयेतयोः शद्रिरंभोधरे
ज्रिघो[illegible] तंद्री निद्राप्रमीलयोः धात्री जनन्यामलकी वसुम
त्युपमातृषु उष्ट्री गोलकिकायां स्यात्करभस्य च योषिति क्रो
ष्ट्रीसृगालिकाक्षीरविदारीलांगलीषु च तरिर्नौविदशायां
च वस्त्रादीनां च पेटके जारी स्याद्दोषधीभेदे जारस्तूपपताव
पि दूरा वारिसुरा भूमिर्भारती बुध्यते स्थिरा भूमौ शालपर्ण्या
स्थिरो निश्चलमोक्षयोः धरा सैन्याग्रिमस्कंधसंततौ पत्तनांत
रे द्रवद्रव्यप्रयाते पितुरंगगतिपंचके खड्गादीनां च निशितमुखे
धारा प्रकीर्तिता धाराकुच्चे घनासारवर्षणे स्यादृणेऽपि च वी

रास्यात्क्षीरकाकोलीतामलक्योल्लवाब्धुषु पतिपुत्रवतीरंभाठंभा
रीमदिरासु च गोष्ठाडुंबरिकाक्षीरविदारीदुग्धिकासु च गौरस्तु
सुभटेश्रेष्ठे वीरं शृंग्यां नतेपि च आर्द्रानक्षत्रभेदे स्यादार्द्रं क्लिन्ने
निधेयवत् यात्रातुयापनोपायगतौदेवाद्युत्सवे उग्रागव्युप
विज्ञायामुस्त्रस्तुकिरणे मतः ऋस्त्राकाकनदीमींस्यो ऋस्त्रः स्या
द्घातुकेन्यवत् रत्रि अमरास्त्रिदशेप्यास्तिसंहारे कुलिशद्रुमे
दूर्वीमरावतीस्थूणागुडूचीष्वमरास्मृता अमरं त्वधुनार्थे स्या
त्पश्चाद्भाते च दंतिनां अर्वाचीने परं प्राग्जुजरायां चापरामपि अध
रोदंतवसने न्यूर्ध्वभीनेऽधरोन्यवत् अध्वरो वसुभेदे स्यात्सव
धाकृतावपि अंतरं तुपरीधानभेदे रंध्राववैकौनयोः आत्मीत
र्द्धिविनाम्नायवहि भिध्यावघिष्ठापि तादर्थ्येवसरे चोक्तमवरं चर
मेन्यवत् गज्ञांतज्ञघादेशे च भवा न्यामवरा मता उत्तरं प्रतिवाक्ये
स्यादूर्ध्वोदीच्योत्तमेन्यवत् उत्तरस्तु विराटस्य तनयोदिशि चोत्तरा
दूतरः पामरेन्यस्मिन्नुदारं बृहत्त्ववर्णियोः अक्षरं वारिधारायामक्षरो
त्तत्वेप्रिस्मृतः प्रवरं संततौ गोत्रे श्रेष्ठे तु प्रवरोन्यवत् शवरो

वारि चेङ्गलभेदयोः शंकरे पि च अंबरं वाससि व्योम्नि कर्पासे च सु
गंधके संवरं सलिले चैत्ये बौद्धव्रतविशेषयोः शंबरो दैत्यहरि
णमत्स्यशैलजिनांतरे ढोबधी शंबरी प्रांशुः प्रखरोऽश्वतरे
शुनि तुरंगाणां च सन्नाहे प्रखरोतिभृशं खरे शिखरं शैलवृ
क्षाग्रकक्षापुलककोटिषु पक्वदाडिमबीजाभमाणिक्यशक
लेपि च शिंखरिखरस्तु शिलाभेदे खड्गे गोवारिवालके शिंखरिख
राबद्धबमुत्ते शिखरस्तु महीरुहे आसने कुशमुष्टौ च वठरः श
ठवंठयोः कठोरे चापि पिठरं मुस्तमंथानदंडयोः पिठरः स्था
दुखायां च जठरः कठिनेप्यवत् कुक्षौ च जठरं प्रोक्तं वठरस्ता
लपल्लवे करीरः कोशोप्यररं कपाटे छदने पि च कररः क्रकचे
दीने करीरः प्रोरगांतरे कदरः श्वेतखदिरे क्षुद्ररोगे पिमाष्ठितः
वदरं कोलिकर्पासयोः फलेस्या दुदरोमयोः एलापर्णीतु वदरी
खि छत्रकी तोयधावपि प्रदरो रोगभेदे स्यात् प्रदरः शरभंगयोः
मकरो यादसि ज्ञेयो निधिराशिप्रभेदयोः निकरो निवहे भारे
न्याय्यदेवधनांतरे शीकरं शंबरे वातसृष्टांबुकणयोर्विदुः प्रक
रश्चोपकारश्च विकीर्णकुसुमादिषु संहतौ चोपकृत्यायां यथा

संरम्भगर्वास्थितौ योगके प्रवरः प्रोक्तः प्रकरी चत्वरावसौ विस्तारस्तु प्रपं
चस्याद्विस्तारे प्रणयेऽपि च संस्तरप्रस्तरावेतौ प्रस्ताराध्वरयोरपि मणि
पाषाणयोश्चापि यथासंख्यमुदीरितौ टगरष्टंकणक्षारे नेत्रादिभ्रम
गोचरे वाद्यवत्के करादे च मुद्गरं मल्लिकाभिदि लोष्टादिभेदनेऽपि स्या
दुदरं जठरे युधि प्रसरः प्रणये वेगे संगरे चाथ मत्सरः असह्यपरसं
पत्तौ मात्सर्य्ये कृपणे युधि मत्सरा मक्षिकायां च विसरः प्रसरे व्रजे कुहरं
कोटरे छिद्रे नागराजविशेषयोः दमरो मूषिकायां च स्वल्पे ध्मातरि वा
लोके चमरं चामरे प्राक्पुंसि तु स्त्री मृगभेदयोः चमरी चमरोऽथ गोकामुकेऽपि
मधूद्रवत् रुधिरोंगारके प्रोक्तो रुधिरं कुंकुमास्रजोः मंदिरो नेकपे चेन्द्रे
मुन्दरः कामुके बुदे किंकिरो भास्वरे वक्षे मुन्दिरः कामभूर्वियोः विवरं दू
षणे गर्ते कण्ठितं छिद्रं ध्रुवत् रवपुरः कामुके भद्रमुस्तके लसके ऽपि च
गोपुरं च पुरद्वारे द्वारमात्रे च मुस्तके चिकुरश्चपले केशे शरनवभुजंगयो
ः पक्षीद्रुभेदयोः शैलेवंकुरोऽरघट्टयोः अंकुरो रुधिरे रोम्नि पानीयेऽपि
नवोद्भिदि कुकुरो वक्रपुच्छस्याद्भ्रष्टिपर्णी तु कुकुरं मुकुरो मल्लिकापुष्पे द
र्पणे वकुलद्रुमे कुलालदंडे मुकुरो मकुरोऽप्येषु विश्रुतः अजिरं प्रांगणे वा
ते विषये दर्दुरे तनौ असिरो रात्सेवका वासरस्तपनेऽपि च शिशिरः स्याद्दतौ

भेदे तुषारः शीतलेऽन्यवत् वशिरं किलिमी सिंधुलवणे गजकणास्तु च सु
षिरं विवरे वाद्ये सरंध्रे सुषिरोऽन्यवत् सुषिरोऽग्नौ च तमिस्रं ध्वांते नेत्रामये
पि च । छिद्रिरः पावके रज्जौ करवाले परस्वधे वंतुरं वाच्यवद्ध्याढ्यविषमोन्न
तदंतयोः विदुरो नागरे धीरे कौरवाणां च मंत्रिणि विधुरं स्यात्प्रविश्लेषे विधुरो
विकलेऽन्यवत् विधुरापि च रसालायां मधुरस्तु रसे विषे मधुरं रसवत्स्वादुप्रि
यबुमधुरोऽन्यवत् मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः मधुकुक्कुटिका
भेदे मधूलीयष्टिकासु च वंधूरं वंधुरे रम्ये नम्रे हंसे तु वंधुरः वंधूके च वि
डंगे वंधुकारण्ययोष्ठिते वर्वरः पामरे केशविन्यासे नीवृदंतरे वर्वरः फ
तिकायां च वर्वरा शाकपुष्पयोः कर्वुरं सलिले हेम्नि कर्वुरः पापरक्षसोः
कर्वुरा कृष्णवृंतायां काश्मीरे कर्वुरोऽन्यवत् कर्परः स्यात्कपाटे च
शस्त्रभेदकटाहयोः कूर्परो जानुनि प्रोक्तः कफोणावपि कूर्परः ख
र्परस्तस्करे धूर्ते भिक्षापात्रकपालयोः गर्गरो मीनभेदस्यान्मंथि
न्यामपि गर्गरी घर्घरस्तु चलद्वारि ध्वने घूके नदांतरे निर्झरस्तु स
हस्रांशुतुरंगे तुषपावके मुर्मुरस्तुषवह्नौ स्यान्मन्मथे रविवाजिनि
जर्जरो वाच्यवज्जीर्णे जर्जरं वासवध्वजे निर्जरस्तु जरात्यक्ते वाच्यव
न्निर्जरः सुरे निर्जरा तु गुडूच्यां स्यात्तालपत्र्यामपि क्वचित् सर्जरः
७२ स्यात्कलिद्रुमे वाद्यभांडे नदांतरे दर्दरस्तु गिरावीषद्भग्नवस्तुनि वा १७

कांडेजपत्नीभुविश्रुता विप्रेनुब्राह्मणोवेदे ब्राह्मणंद्विजसंहतौ
पक्षिणीपूर्णिमायांस्यात्ताडिनीशाकिनीभिदि रक्तगंधस्यवर्तमाना
मनुष्यत्रात्रौचपक्षिणी रोहिणीकटुरोहिण्यांरोहिणीलोहिता
गवाः कंठरोगांतरेभेदे सोमवल्केचरोहिणी ण चतुष्क ४ आ
तपणंवसोमित्येविद्यात्प्राणीपणेपिच आथर्वणोथर्ववित्ब्राह्म
णेविपुरोधसि आरोहणंस्यात्सोपानेसमारोहेप्ररोहणे रक्तरेणु
स्तुसिंदूरेपलाशकलिकोद्गमे उत्क्षेपणंतुव्यजनेधान्यमर्दनव
स्तुनि उत्करणंसमुत्कारे वांतायांतन्मूलनेप्यपि निगरणंभोजने
पिगलेनिगरणोमतः निःसरणंस्यान्मरणेपायाने निर्गमणेनु
क्तिषु संसरणंरणारंभे पुरनिर्गमनापुरे घंटापथेचसंसारेप्य
संबाधचमूपतौ निस्तरणंस्यादुपायेचनिस्तारेनिर्गमेपिच विद
रणंरणभेदेविडंगेचविदारणं निरूपणंस्यादालोकेविचारेच
निदर्शने नारायणोच्युतेभीरुगौर्यांनारायणींविदुः पारायण
मभीष्टेस्यात्तत्पराश्रययोरपि पारायणंसमासंगकार्यकारण
कार्षापणः कार्षिकःस्यात्पणेषोडशकेपिच कामगुणःस्मृतो
रागेविषयाभोगयोरपि परीरणःस्यात्कमठेदंडेचपटशाटके
समीरणःस्यात्पवनेपथिकेचफणिज्झके वर्वरीणंतुपर्णासस्यात्स्त्रि

शयांवृन्तेकंवले। पर्णवृन्तंत्वरसेपिस्याद्बर्बरीणंचपर्वणि। तं
डुरीणः कीटमात्रेवर्बरीतंडुलोदके मीनाग्रीणादर्द्दुपा
त्रेमीनाग्रीणःश्रवणेतत्ने प्रवारणंनिषेधेस्यात्काम्यदानेप्र
वारणं जनुःक्षणोरणःधर्षकोरस्तिमाणोमरेवरे देवमणी
शिवेऽश्वस्यकंठावर्त्तेचकोस्तुभे चूडामणिःशिरोरत्नेका
कचिंच्याःफलेपिच परवाणिःस्मृतोधर्माध्यक्षवत्सरयो
रपि शरवाणिःशरमुखेपादपिठपदाजीविनि लंवकर्णःस्मृ
तोंकोठपादपेघातनेपिच हस्तिकर्णेनुवृकेस्यात्पलाश
गणभेदयोः वीणिपर्णस्तुनिंवेपिखर्जुरीमुरुणोपिच ग
गपूर्णःस्मरेदंतधावनेरक्तचालुके तैलपर्णीमलयजे
श्रीवासेसिह्लकेपिच पीलुपर्णीतुविंबायांमूर्वायामोष
